વંદિતાશેષવંદ્યોરુવૃંદારકં ચંદનાચર્ચિતો દારપીનાંસકમ |
ઇંદિરાચંચલાપાંગનીરાજિતં મંદરોદ્ધારિ વૃત્તોદ્ભુજાભોગિનં |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૧ ||

સૃષ્ટિસંહારલીલાવિલાસાતતં પુષ્ટષાડ્ગુણ્ય સદ્વિગ્રહોલ્લાસિનમ |
દુષ્ટ નિષ્ષેષસંહારકમોદ્યતં હૃષ્ટપુષ્ટાનુતિશિષ્ટ પ્રજાસંશ્રયં |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૨ ||

ઉન્નતપ્રાર્થિતાશેષસંસાધકં સન્નતાલૌકિકા નંદદ શ્રીપદમ |
ભિન્નકર્માશયપ્રાણિસંપ્રેરકંતન્નકિંનેતિ વિદ્વત્સુ મિમાંસિતં |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૩ ||

વિપ્રમુખ્યૈઃ સદાવેદવાદોન્મુખૈઃ સુપ્રતાપૈઃ ક્ષીતિશેશ્વરૈશ્ચાર્ચિતં |
અપ્રતર્ક્યોરુસંવિદ્ગુણં નિર્મલં સપ્રકાશાજરાનંદ રૂપંપરં |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૪ ||

અત્યયો યસ્યકેનાપિનક્વાપિહિપ્રત્યતો યદ્ગુણેષૂત્તમાનાંપરઃ |
સત્યસંકલ્પ એકો વરોણ્યો વશી મત્યનૂનૈઃ સદા વેદવાદોદિતઃ |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૫

||
પશ્યતાં દુઃખસંતાનનિર્મૂલનં દૃશ્યતાં દૃશ્યતામિત્ય જેશાચિ(ર્થિ)તમ |
નશ્યતાં દૂરગં સર્વદાપ્યાત્મગં પશ્યતાં સ્વેચ્ચયા સજ્જનેષ્વાગતં |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૬
||
અગ્રજં યઃ સસર્જાજમગ્ર્યાકૃતિં વિગ્રહોયસ્ય સર્વેગુણા એવ હિ |
ઉગ્ર આદ્યોડપિ યસ્યાત્મજાગ્ર્યાત્મજઃ સદ્ગૃહીતઃ સદાયઃ પરંદૈવતમ |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૭
||
અચ્યુતો યો ગુણૈર્નિત્યમેવાખિલૈઃ પ્રચ્યુતોડશેષ દોષૈઃ સદાપૂર્તિત |
ઉચ્યતે સવવેદોરુ વાદૈરજઃ સ્વર્જિતો(ચ્યતે) બ્રહ્મરુદ્રેંદ્ર પૂર્વૈસ્સદા |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૮
||
ધાર્યતે યેનવિશ્વં સદાજાદિકં વાર્યતેશેષદુઃખં નિજધ્યાયિનાં |
પાર્યતે સર્વમન્યૈર્નયત્પાર્યતે કાર્યતે ચાખિલં સર્વભૂતૈઃ સદા |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં || ૯
||
સવપાપાનિ યત્સંસ્મૃતેઃ સંક્ષયસર્વદા યાંતિભક્ત્યાવિશુદ્ધાત્મનાં |
શર્વગુર્વાદિગીર્વાણ સંસ્થાનદઃ કુર્વતે કર્મ યત્પ્રીતયે સજ્જનાઃ |

પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં ||
૧૦ ||
અક્ષયં કર્મયસ્મિન પરેસ્વર્પિતંડપ્રક્ષ યં યાંતિ દુઃખાનિઃયન્નામત |
અક્ષરોયોડજરઃ સર્વદૈવામૃતઃ કુક્ષિગં યસ્ય વિશ્વં સદાજાદકમ |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં ||
૧૧ ||
નંદિતીર્થોરુસન્નામિનો નંદિનઃ સંદધાનાઃ સદાનંદદેવે મતિમ |
મંદહાસારુણાપાંગ દત્તોન્નતિં ન(વં)દિતા શેષદેવાદિ વૃંદં સદા |
પ્રીણયામો વાસુદેવં દેવતામંડલા ખંડમંડનં પ્રીણયામો વાસુદેવં ||
૧૨ ||
ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્ય વિરચિતં
દ્વાદશસ્તોત્રેષુ અષ્ટમસ્તોત્રં સંપૂર્ણ